## पात्रेसमितादयश्च। (४८/७२५)

समुदाया एव निपात्यन्ते। पात्रेसमितादयः शब्दास्तत्पुरुषसञ्ज्ञा भवन्ति क्षेपे गम्यमाने। [1]ये चात्र क्तान्तेन सह [2]समासाः, तेषां पूर्वेणैव [3]सिद्धे पुनः पाठो युक्तारोह्यादि[4]परिग्रहार्थः, पूर्वपदाद्युदात्तत्वं यथा स्यात् [5]इति। युक्तारोह्यादिषु हि पात्रेसमितादयश्च इति पठ्यते। पात्रेसमिताः। पात्रेबहुलाः। अवधारणेन क्षेपो गम्यते, पात्रे एव समिता[6] न पुनः क्वचित् कार्ये इति। उदुम्बरमशकादिषु उपमया क्षेपः। मातरिपुरुषः इति [7]प्रतिषिद्धसेवनेन। [8]पिण्डीशूरादिषु निरीहतया। अव्यक्तत्त्वाच्चाकृतिगणोऽयम्।

[9]पात्रेसमिताः। पात्रेबहुलाः। [10]उदुम्बरमशकाः। उदरक्रिमिः। कूपकच्छपः। [11]कूपचूर्णकः। [12]अवटकच्छपः। कूपमण्डूकः। [13]कुम्भमण्डूकः। [14]उदपानमण्डूकः। नगरकाकः। नगरवायसः। मातरिषुरुषः। पिण्डीशूरः। [15]पितरिशूरः। गेहेशूरः। [16]गेहेनर्दी। गेहेक्ष्वेडी। गेहेविजिती। [17]गेहेव्याडः। गेहेमेही। [18]गेहेदाही। गेहेदृप्तः। [19]गेहेधृष्टः। गर्भेतृप्तः। आखनिकबकः। गोष्ठेशूरः। गोष्ठेविजिती। [20]गोष्ठेक्ष्वेडी। गोष्ठेपटुः। गोष्ठेपण्डितः। गोष्ठेप्रगल्भः। कर्णेटिट्टिभः। [21]कर्णेटिरिटिरा। [22]कर्णेचुरचुरा।

चकारोऽवधारणार्थः, तेन समासान्तरं न भवति, परमपात्रेसमिताः इति॥

## पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन। (४९/७२६)

सुप् सुपा इति वर्तते। तस्य [23]विशेषणमेतत्। पूर्वकाल एक सर्व जरत् पुराण नव केवल इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च समासो भवति। [24]भिन्नप्रवृत्तिनिमित्तस्य शब्दस्यैकस्मिन्नर्थे [25]वृत्तिः [26]सामानाधिकरण्यम्। पूर्वकालः इत्यर्थनिर्देशः, परिशिष्टानां स्वरूपग्रहणम्। पूर्वकालोऽपरकालेन[27] समस्यते। स्नातानुलिप्तः। [28]कृष्टसमीकृतम्। [29]दग्धप्ररूढम्। एकशाटी। एकभिक्षा। सर्वदेवाः। सर्वमनुष्याः। [30]जरद्धस्ती। [31]जरद्गृष्टिः। [32]जरद्वृत्तिः। पुराणान्नम्। पुराणावसथम्। नवान्नम्। [33]नवावसथम्। केवलान्नम्[34]। समानाधिकरणेन इति किम्? एकस्याः शाटी[35]॥

---

1. येषामत्र ब. क. इ. 2. समस्ताः फ. 3. सिद्धः इ. 4. °परिग्रहार्थम् फ. 5. इति नास्ति क.
6. भोजन एव समिताः इत्यधिकम् क. 7. प्रतिषिद्धासेवनेन फ. ह. 8. पिण्डीश्वरादिषु ब. 9. नास्ति फ.
10. नास्ति ब, उदुम्बरक्रिमिः इ. 11. नास्ति क. फ. 12. नास्ति फ. 13. नास्ति ब. 14. नास्ति फ.
15. नास्ति ब. ह. 16. गेहेनर्ती ह. 17. गेहेव्याधः फ. ह. 18. नास्ति ड. ह. 19. नास्ति ह. 20. नास्ति
ब. 21. कर्मेकिरिटिका ह, कर्मेटिरहिरा इ. 22. कर्मेचुरुचुका ह. 23. विशेषणं चैतत् ग. 24. भिन्न–
प्रवृत्तिनिमित्तत्वमेकस्मिन्नर्थे फ. 25. प्रवृत्तिः ग. इ. 26. समाना° इ. 27. सह इत्यधिकम् ड. इ. 28. कृष्ट–
मतिकृष्टं ड, कृष्टमतीकृतं क, °कृतः ह. 29. °प्ररूढः फ. ह. 30. जरद्दन्ती ड. 31. नास्ति क. ह.
32. जरदातिः क. 33. नवावसथः क. फ. 34. केवलावसथः इत्यधिकम् क. ड. फ. ह. ग. 35. वर्तते
इत्यधिकम ग.